**विद्या भवन बालिका विद्यापीठ लखीसराय**

**वर्ग दशम् विषय संस्कृत शिक्षक श्यामउदय सिंह**

**ता:-३०/०५/२०२० (बोर्ड बेस्ड क्वेश्चन )**

**अधोलिखितनाट्यांशं पठित्वा तदाधारितानां प्रश्नानां उत्तराणि संस्कृतभाषया लिखत-**

**# राम: ---- (स्वगतम्) धिङ् मामेवंभूतम् ।सा तपस्विनी मत्कृतेनापराधेन स्वापत्यमेवं मन्युगर्भैरक्षरैर्निर्भर्त्सयति।(सवाष्पमवलोकयति)**

**राम:---अतिदीर्घ: प्रवासोऽयं दारुणश्च ।(विदूषकमवलोक्य जनान्तिकम्)कुतूहलेनाविष्टो मातरमनयोर्नामतो वेदितुमिच्छामि ।न युक्तं च स्त्रीगतमनुयोक्तुम ,विशेषतस्तपोवने ।**तत् कोऽत्राभ्युपाय:।

विदूषक:--- (जनान्तिकम्) अहं पुन:पृच्छामि ।(प्रकाशम् )किं नामधेया युवयोर्जननी?

लव:---तस्या:द्वे नामनी ।

विदूषक:--- कथमिव ?

लव:---तपोवनवासिनो देवीति नाम्नाह्वयन्ति, भगवान वाल्मीकिर्वधूरिति ।

राम:---अपि च इतस्तावद् वयस्य! मुहूर्तमात्रम् ।

विदूषक:---(उपसृत्य) आज्ञापयतु भवान्।

राम:----अपि कुमारयोरनयोरस्माकं च सर्वथा समरूप कुटम्बवृत्तान्त:

( नेपथ्ये )

आरती वेला सञ्जाता रामायणगानस्य नियोग किमर्थं न विधीयते?

उभौ---राजन्! उपाध्यायदूतोऽस्मान् त्वरयति।

राम:---मयापि सम्माननीय एव मुनिनियोग: ।तथा हि–

१.एकपदेन उत्तरत –

(i) कुशलवयो: मातरम् तपोवनवासिन: केन नाम्ना आह्वयन्ति ?

(ii) अयं प्रवास: कीदृश:आसीत्?

२.पूर्णवाक्येन उत्तरत –

(i) सा तपस्विनी केन अपराधेन स्वापत्यम् मन्युगर्भै: अक्षरै: निर्भर्त्सयति?

(ii)विशेषत: तपोवने किं न युक्तम् ?

३.भाषिककार्यम्

(i) 'धिङ् मामेवंभूतम्' अत्र 'माम्' पदं कस्मै प्रयुक्तम्?

(ii)'दृष्ट्वा 'इत्यर्थे किं पदम् अत्र प्रयुक्तं?

(iii) 'समय:' इत्यस्य क: पर्याय: नाट्यांशे लिखित:?

(iv) 'समरूप: कुटुम्बवृत्तान्त:' अनयो: पदयो: विशेषणपदं किम्?